## सम्प्रसारणाच्च। (१०८/३३०)

पूर्वः [1]इत्येव। सम्प्रसारणात् अचि [2]परतः पूर्वपरयोः [3]स्थाने पूर्वरूपमेकादेशो भवति। यजि – इष्टम्। वपि – उप्तम्। ग्रहि – गृहीतम्। सम्प्रसारण[4]विधानसामर्थ्यात् विगृहीतस्य श्रवणे प्राप्ते [5]पूर्वत्वं विधीयते। 'वा छन्दसि' (६.१.१०६/३५१५) इत्येव, [6]'मित्रो नो अत्र वरुणो यज्यमानः' (अ.वे. १८.१.३९)। परपूर्वत्व-विधाने सत्यर्थवत् सम्प्रसारणविधानम् इति [7]इष्ट इत्येवमादिषु पूर्वत्वाभावे यणादेशो भवत्येव। अन्तरङ्गे चाचि कृतार्थं वचनम् इति बाह्ये पश्चात् सन्निपतिते पूर्वत्वं न भवति। शकह्वौ। [8]शकह्वर्थम्॥

## एङः पदान्तादति। (१०९/८६)

एङ् यः पदान्तः तस्मादति परतः पूर्वपरयोः [9]स्थाने पूर्वरूपमेकादेशो भवति। अग्नेऽत्र। वायोऽत्र। अयवादेशयोरयमपवादः। एङः इति किम्? दध्यत्र। [10]मध्वत्र। पदान्तात् इति किम्? [11]चयनम्। लवनम्। अति इति किम्? वायो इति। [12]भानो इति। वायविति। [13]भानविति। तपरकरणम् इति किम्? वायवायाहि॥

## ङसिङसोश्च। (११०/२४६)

एङः [14]इति वर्तते, [15]अति इति च। एङः उत्तरयोः ङसिङसोः अति परतः पूर्वपरयोः [16]स्थाने पूर्वरूपमेकादेशो भवति। अग्नेरागच्छति। वायोरागच्छति। अग्नेः स्वम्। वायोः स्वम्। अपदान्तार्थः आरम्भः॥

## ऋत उत्। (१११/२७०)

[17]ङसिङसोः इत्येव। [18]ऋकारान्तादुत्तरयोः ङसिङसोः अति [19]परतः पूर्वपरयोः उकार[20] एकादेशो भवति। होतुरागच्छति। होतुः स्वम्। द्वयोः षष्ठीनिर्दिष्टयोः [21]स्थाने यः[22] स लभते[23]ऽन्यतरव्यपदेशम् इति 'उरण् रपरः' (१.१.५१/७०) इति रपरत्वम् [24]अत्र कृत्वा 'रात् सस्य' (८.२.२४/२८०) इति [25]सलोपः कर्तव्यः॥

## ख्यत्यात् परस्य। (११२/२६६)

ङसिङसोः इति वर्तते, उत् इति च। ख्यत्यात् इति खिशब्दखीशब्दयोः तिशब्दतीशब्दयोश्च कृतयणादेश-योरि[26]दं ग्रहणं, ताभ्यां [27]परस्य ङसिङसोः [28]अत उकारादेशो भवति। सख्युरागच्छति। सख्युः स्वम्। पत्युरा-गच्छति। पत्युः स्वम्। खीशब्दस्योदाहरणम् – सह खेन वर्तते इति सखः, तमिच्छति इति [29]क्यच् सखीयति।

---

1. एव नास्ति फ, इत्यनुवर्तते क. 2. परतः नास्ति क. 3. पूर्व एकादेशो ड. 4. °वचन° ड. 5. पूर्वरूपत्वं क.ह. 6. मित्रावरुणौ इज्यमानौ क.ड.फ, यज्यमानौ ह. 7. इष्टः नास्ति फ. 8. शकह्वत्वमिति क. 9. स्थाने नास्ति क. 10. मध्वत्र नास्ति ग.फ. 11. नयनम् क.ड.ग.फ, पवनम् ब. 12–13. नास्ति फ. 14. इत्येव फ. 15. अति इति च नास्ति ग. 16. स्थाने नास्ति क. 17. वाक्यमिदं नास्ति फ. 18. ऋतः फ. 19. परतः नास्ति क.ड. 20. इति इत्यधिकम् फ. 21. स्थाने नास्ति फ. 22. आदेशः इत्यधिकम् ग.फ.ह, सम्पद्यते इत्यधिकम् क, लभ्यते इत्यधिकम् फ. 23. अन्यतरस्य व्यपदेशम् फ. 24. तत्र कृते फ. 25. सकारलोपः फ. 26. इदं नास्ति ग.फ. 27. परतः क, परयोः ग. 28. अकारस्य फ. 29. क्यच् नास्ति फ.